असम्भवं हेममृगस्य जन्म तथापि रामो लुलुभे मृगाय ।
प्रायः समापन्नविपत्तिकाले धियोऽपि पुंसां मलिना भवन्ति ॥

हितोपदेशे मित्रलाभः २८

पदच्छेदः - असम्भवम् हेममृगस्य जन्म तथापि रामः लुलुभे मृगाय । प्रायः समापन्नविपत्तिकाले धियः अपि पुम्साम् मलिनाः भवन्ति ॥

अन्वयः – हेममृगस्य जन्म असम्भवम् । तथापि रामो मृगाय लुलुभे । प्रायः समापन्नविपत्तिकाले पुंसां धियोऽपि मलिना भवन्ति ।

व्याख्या – हेम अर्थात् सुवर्णम्, मृगः नाम हरिणः, तेन निर्मितः मृगः, हेममृगः नाम सुवर्णमृगः सुवर्णहरिणः स्वर्णमृगो वा । तस्य जन्म असम्भवम् अर्थात् न सम्भवति । स्वर्णहरिणस्य जन्म न सम्भवति । एतस्य सम्भवो न भवति । कुत्रापि सुवर्णहरिणस्य जन्म न सम्भवति । तथापि रामः अर्थात् भगवान् श्रीरामचन्द्रः (विष्णोः अवतारभूतः) सुवर्णहरिणं प्राप्तुं लुलुभे नाम लोभं कृतवान् । अतः कथ्यते यत् प्रायः अर्थात् कदाचित्, प्रायशः, सम्भवतः, सामान्यतः, वा समापन्न अर्थात् आगत, समागत, उपस्थित वा विपत्तिकालः नाम विपत्समयः आपत्समयः व्यसनसमयः विषमसमयः वा अर्थात् यदा कस्यचित् नरस्य विपत्समयः उपस्थितः भवति अर्थात् अथवा विषमसमयः आगच्छति तदा पुंसां नाम नराणां मनुष्याणां वा धियः नाम बुद्धयः मतयः ज्ञानं वा (धीः अर्थात् बुद्धिः मतिः वा) मलिनाः भवन्ति नाम दूषिताः दोषयुक्ताः भवन्ति अशुद्धाः भवन्ति । अर्थात् विपत्काले मनुष्याणां बुद्धिः दूषिता भवति बुद्धिः नश्यति । ज्ञानं च नश्यति । स कियान् विद्वान् भवतु नाम? स कियान् पण्डितः भवतु नाम? स कियान् महान् दिव्यगुणसम्पन्नः भवतु नाम? स देवः भवतु वा मानवः भवतु वा, आपत्काले सर्वेषां बुद्धिः स्खलति, नश्यति, कार्यं न करोति । यथा श्रीरामचन्द्रः भगवत्स्वरूपः सन्नपि दिव्यगुणयुक्तः भूत्वापि तस्य बुद्धिः विषमकाले उपस्थिते अनश्यत् नष्टा अभवत् । अतः स सामान्यहरिणं दृष्ट्वा ऽपि सुवर्णहरिणमिति विचिन्त्य तं हरिणं सीतायै आनेतुं तस्य हरिणस्य पश्चात् बहु दूरम् अधावत् । यतः तस्मिन्नेव काले तस्य बुद्धिः कार्यं न अकरोत् । बुद्धिः नष्टा अभवत् । अतः

एवमपि उच्यते यद् विनाशकाले विपरीता बुद्धिः इति । अर्थात् यदा विनाशकालः उपस्थितः भवति तदा मनुष्यस्य बुद्धिः विपरीतदिशि गच्छति । नश्यति इति अर्थः । बुद्धिनाशः भवति इति अर्थः । सुभाषितमिदं रामा नाम उपजातिः इति छन्दसा लिखितमस्ति । एतस्य छन्दसः लक्षणमेवमस्ति । यत्र प्रथमद्वितीयपादौ उपेन्द्रवज्रायाः, तृतीयपादः इन्द्रवज्रायाः चतुर्थपादः उपेन्द्रवज्रायाः च भवन्ति सा रामा नाम उपजातिः ज्ञेया । एतत् छन्दः विषमवृत्तं भवति ।

अ स म्भ वं हे म मृ ग स्य ज न्म - उपेन्द्रवज्रायाः

त था पि रा मो लु लु भे मृ गा य - उपेन्द्रवज्रायाः

प्रा यः स मा प न्न वि प त्ति का ले - इन्द्रवज्रायाः

धि यो पि पुं सां म लि ना भ व न्ति - उपेन्द्रवज्रायाः

It has 44 syllables. रामा

ल गु ल गु गु ल ल गु ल गु गु

ल गु ल गु गु ल ल गु ल गु गु

गु गु ल गु गु ल ल गु ल गु गु

ल गु ल गु गु ल ल गु ल गु गु

This is a विषम-वृत्त.
ल stands for laghu, short, light, and गु stands for guru, long or heavy.